International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2025; 2(6): 132-135
© 2025 IJMH
www.themultijournal.com
Received: 12-12-2025
Accepted: 27-12-2025
Publish : 29-12-2025

**डॉ.शकुन्तलादाशः**
अतिथि-अध्यापिका
(सहायकाचार्यश्रेणी),
धर्मशास्त्रविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ.शकुन्तलादाशः**
अतिथि-अध्यापिका,
(सहायकाचार्यश्रेणी),
धर्मशास्त्रविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी

# पुरुषार्थचतुष्टयसाधनाय आचारस्य अनिवार्यता

**डॉ.शकुन्तलादाशः**

**शोधसारः**

अयं शोधलेखः भारतीयधर्मशास्त्रपरम्परायाम् आचारस्य परममहत्त्वं विवेचयति। धर्मः श्रुतिस्मृतिषु सैद्धान्तिकरूपेण प्रतिपादितः सन् यदा जीवनव्यवहारे आचरणरूपेण अवतीर्णो भवति, तदैव स यथार्थतः धर्मः इति अस्मिन् अध्ययने प्रतिपाद्यते। श्रुति-स्मृति-आचार-आत्मतुष्टिरूपेषु धर्मप्रमाणेषु आचारः व्यवहारात्मकधर्मस्य मूलाधारः इति निष्कर्षः स्थाप्यते।

मनुस्मृति-वसिष्ठधर्मसूत्र-पराशरस्मृत्यादिग्रन्थेषु प्रतिपादितानां श्लोकानां विश्लेषणेन अत्र दर्श्यते यत् सदाचारः केवलं धार्मिकनियमः न, अपि तु व्यक्तित्वनिर्माणस्य, सामाजिकस्थैर्यस्य, नैतिकमूल्यसंर-क्षणस्य तथा पुरुषार्थचतुष्टयसाधनस्य केन्द्रीयसाधनं भवति। आचारात् आयुः, आरोग्यं, यशः, प्रजाः, धनं च लभ्यते, दुराचारात् तु निन्दा, व्याधिः, अल्पायुः तथा धर्मविच्युतिः जायते इति धर्मशास्त्रीयनिश्चयः अत्र स्पष्टतया प्रतिपादितः।

अध्ययनस्य निष्कर्षरूपेण अयं भावः स्थापितः यत् आचारः एव धर्मस्य प्राणतत्त्वं, शास्त्रज्ञानस्य फलसाधकः, तथा इह– परत्र उभयत्र मानवकल्याणस्य सुनिश्चिताधारः भवति। अतः आधुनिकसमाजेऽपि भारतीयधर्मपरम्परानुसारेण सदाचारस्य पुनः प्रतिष्ठापनं नितान्तम् आवश्यकम् इति अस्य शोधस्य अभिप्रायः।

**कूटशब्दाः (Keywords)**

आचारः, सदाचारः, धर्मशास्त्रम्, श्रुति-स्मृतिः, पुरुषार्थचतुष्टयम्, धर्मप्रमाणानि, नैतिकमूल्यानि, भारतीयसंस्कृतिः, सामाजिकस्थैर्यम्, व्यक्तित्वनिर्माणम् ।

**विषयविन्यासः**

संसारेऽस्मिन् मनुष्यस्य हिताय, विकाशाय, प्रचलनाय,परिवर्द्धनाय च धर्मस्य तत् प्रतिपादकशास्त्रस्य चातीवावश्यकता वरीवर्तते। यतो हि धर्मं विना मनुष्यः केनाचित् प्रकारेण ऐहिक-पारत्रिकसमृद्धिसाधकजीवनमतिवाहयितुं समर्थो न भवति। पुरुषार्थचतुष्टयप्राप्तिः हिन्दुधर्मस्य हिन्दुत्वस्य च चरमं परमं च लक्ष्यं भवति। वेदानुमापकतया स्मृत्यादीनां धर्मे प्रामाण्यात् धर्मशास्त्रमेव पुरुषार्थचतुष्टयस्य प्रमुखं प्रतिपादकमिति महतो प्रमोदस्य विषयः ।

[1]वेदो धर्मस्य मूलं प्रमाणम्। तदनुमापकत्वेन स्मृतिरेव तस्य द्वितीयं प्रमाणम्। तृतीयं च सदाचारः। वैकल्पिके विषये आत्मतुष्टिरेव चतुर्थं स्थानं विभर्त्ति ।यथाहुः –

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥**[2]

यद्यपि एतेषां ज्ञापकहेतुत्वेन गणना [3]याज्ञवल्क्येन विहित तथापि समाजेन सह आचारस्य संपर्को अन्यापेक्षया सरसः । श्रुतयः स्मृतयश्च शास्त्राणि भवन्ति । तदनुरोधेन आचारस्य प्राणाण्यात् श्रुतिः स्मृतिश्च तस्य द्वे नयने । श्रुतेः स्मृतेश्च ज्ञानाभावात् सदाचारस्य ज्ञानं असम्भवम् । आचाराभावे तु मनुष्य अन्ध इव प्रतीयमानो भवति। तथाहि उक्तम्-

**आचारः परमो धर्मः श्रुत्योक्तः स्मार्त एव च ।**
**तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ॥**[4]

मनोरिदं वचनं धर्मस्य यथार्थस्वरूपं स्पष्टयति। आचारः नाम शीलसम्पन्नं, शास्त्रानुगतं, समाजोपयोगि च जीवनव्यवहारः। स एव धर्मस्य परमं रूपं भवति। धर्मः केवलं शास्त्रपठनेन न सिध्यति, अपि तु तदनुष्ठानेन, यत् आचाररूपेण प्रत्यक्षीभवति। अयं आचारः न केवलं स्मृत्युक्तः, अपि तु श्रुतिष्वपि प्रतिपादितः। अतः श्रुतिस्मृत्योरुभयोरपि सम्मतेन आचारः एव धर्मस्य चरमस्वरूपं भवति। यतः श्रुतयः धर्मस्य मूलं भवन्ति, स्मृतयश्च तस्य व्यावहारिकव्याख्यानं कुर्वन्ति, तयोः उभयोः सारः आचाररूपेण जीवनव्यवहारे अवतीर्णः भवति।अतः द्विजः विशेषतः शास्त्राध्ययनाधिकारयुक्तः पुरुषः सदैव आचारे युक्तः भवेत्। आचारनिष्ठया एव स आत्मवान् भवति, इन्द्रियनिग्रहसम्पन्नः, अन्तः करणशुद्धः च जायते। आचाररहितः द्विजः नाममात्रेण द्विजः, किन्तु आचारयुक्तः एव तत्त्वतः धर्मपालकः भवति।

यतो हि सदाचारेणैव मनुष्यस्य सत्प्रवृत्तिस्तथा ज्ञानोदयो भवति। मनुष्यो यदि किमपि कार्यमाचारमाध्यमेन करोति तर्हि स किमपि फलमवश्यमेव प्राप्नोति । विषयेऽस्मिन् [5]मनुना कथितं यत्-

**आचाराद् विच्युतो विप्रो न वेदफलमश्नुते ।**
**आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत् ।।**

अस्मिन् श्लोके आचारस्य फलसाधकत्वं प्रत्यक्षतया प्रतिपाद्यते। यः विप्रः वेदाध्ययनपरः, विधिज्ञः यदि आचारात् विच्युतः भवति, अर्थात् यदि स सदाचाररहितः भवति, तर्हि स वेदाध्ययनस्य फलं न प्राप्नोति। केवलं वेदपाठः, यज्ञकर्मज्ञानं वा, आचारविहीनस्य पुरुषस्य मोक्षसाधनं न भवति।वेदः धर्ममार्गं दर्शयति, परन्तु आचारः एव तस्य मार्गस्य गमनं सम्भावयति। अतः आचारविहीनं वेदज्ञानं निष्फलमेव भवति। परन्तु यः पुरुषः आचारेण संयुक्तः भवति सदाचारनिष्ठः, संयमी, धर्मपरायणः स एव वेदविहितकर्मणां सम्पूर्णफलं प्राप्नोति। तस्य वेदाध्ययनं, यज्ञादिकर्माणि, व्रततपांसि च सफलानि भवन्ति। आचारः एव कर्मणां पूर्णतासाधकः, धर्मस्य जीवनरूपः च भवति।

सदाचारः परमो धर्मः इति सर्वसम्मतः सिद्धान्तः । [6]मनुना तु

**चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ।**
**चतुर्णामपि वर्णानामाचारो धर्मपालकः ।।**

आचारनिष्ठो ब्राह्मणः कस्मिन् काले दुःखं नैव प्राप्नोति । यथा पराशरस्मृतौ [7]पराशरेणोक्तं यत्-

**षट् कर्माभिरतो नित्यं देवतातिथिपूजकः ।**
**हुतशेषं तु भुञ्जानो ब्राह्मणो नावसीदति ।।**

यदि मनुष्यः आचारभ्रष्टो भवति तर्हि धर्मस्तस्मात् परांमुखो भवति। तच्च [8]पराशरस्मृतावुप-लभ्यते-

**आचाराभ्रष्टदेहानां भवेद् धर्मः परांमुखः ।।**

समाजस्य व्यक्तेश्च समुन्नतिः आचाराद्वारेणैव सम्भवति । यावत् पर्यन्तं भारतीयसंस्कृतिषु परम्परासु आचारस्य प्राथम्यं वर्त्तते तावत् पर्यन्तं धर्मस्योद्देश्यसाधनं भविष्यति । वेदादि-सर्वशास्त्रविद् मनुष्यो यद्यपि आचारभ्रष्टो धृतिक्षमोन्द्रियनिग्रहादिमानवीयगुणविहीनो भवति तर्हि तस्य सत्यापि शास्त्रज्ञाने आचारभ्रष्ट इति कथ्यते । तेन अधीतानि च शास्त्राणि निष्फलानि भवन्ति । एतस्मिन् विषये [9]वसिष्ठधर्मसूत्रे उल्लिखितमस्ति यत-

**आचारहीनस्य तु ब्राह्मणस्य वेदाः षडाङ्गस्त्वखिलाः सयज्ञाः ।**
**कां प्रीतिमुत्पादयितुं समर्थः अन्धस्य दारा इव दर्शनीयाः ।।**
**आचारः परमो धर्मः श्रुत्युक्तः स्मार्त्त एव च ।**
**तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः ।।**

आचारहीनो भ्रष्टाचारजनस्तु इहलोके सुखं न लभते परलोकेऽपि [10]दुःखमनुभवति। सर्व प्रकारेणाचाराद्धर्मप्राप्तिमृषयो बुध्वा तपसश्चा-न्द्रायणादेः समग्रस्य कारणमाचारमनुष्ठेयतया गृहीतवन्तः । यथाह [11]मनुः-

**एवमाचरतो दृष्ट्वा धर्मस्य मुनयो गतिम् ।**
**सर्वस्य तपसो मूलमाचारं जगृहुः परम् ।।**

श्रौतस्मार्त्तपरम्परायां सर्वत्र दृष्टिपथारुढमानवानामाचरणं श्रोतत्वं स्मार्त्तत्वं च कल्पयितुं शक्यते । यद्यपि कुत्रचित् प्रकाशितासु श्रुतिस्मृतिसु आचारप्रतिपादकानि वाक्यानि नैव दृश्यन्ते तथापि तानि प्रक्षिप्तानीति मत्वा आचाराणां प्रामाण्यमङ्गीकर्तव्यम् । आचारशब्दस्य विमर्शो निखिलेषु धर्मशास्त्रेषु दृश्यते। धर्मशास्त्रेषु समुपलभ्यमानेषु आचारव्यवहार-प्रायश्चितभागेषु आचारस्यैव प्राधान्यात् सर्वत्रैव तस्य सन्निवेशो दृश्यते । आचारोऽध्याये सर्वेषां वर्णानां आश्रमाणां च दैनन्दिनमाचरणं कर्तव्याकर्तव्यञ्च समासेन विचारितमस्ति । याज्ञवल्क्यस्मृत्याचाराध्याय एक स्वतन्त्राध्यायो भवति ।

आचारो भारतीयधर्मस्य मूलाधारो भवति । सर्वेषु स्मृतिग्रन्थेषु आचारस्य महत्वं प्राधान्यं च परिलक्ष्यते । आचारस्य विषये मनुना कथितं यः श्रद्धावान् सदाचारवान् यश्च पुनः परदोषानभिधाता स अन्येषां सर्वेषां सर्वेषामपि मानवीयसुलक्षणानामाभावेनैव शतायुर्भवति । यथा मनुस्मृतौ[12]-

**सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः।**
**श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ।।**

अत्र "सर्वलक्षणहीनः" इति पदेन शारीरिकसौन्दर्यं, जातिवैशिष्ट्यं, विद्वत्त्वम्, ऐश्वर्यं वा यद्यपि कस्यचित् पुरुषस्य न स्यात्, तथापि यदि स नरः सदाचारसम्पन्नः भवति तर्हि स एव श्रेष्ठजीवनस्य अधिकारी इति भावः निहितः। अनेन स्पष्टं भवति यत् धर्मशास्त्रदृष्ट्या बाह्यलक्षणानाम् अपेक्षया आचारस्य नैतिकमूल्यम् अधिकं महत्त्वपूर्णं भवति। "श्रद्धधानः" इत्यनेन तस्य पुरुषस्य धर्मकर्मसु, शास्त्रेषु, तथा सत्कर्मसु दृढविश्वासः सूचितः। श्रद्धा धर्माचरणस्य मूलं भवति, यतः श्रद्धाविहीनः कर्मणां फलप्राप्तिः न सिध्यति। "अनसूयः" इति पदेन परदोषदर्शनरहितः, अद्वेषभावयुक्तः, सौहार्दपरः च पुरुषः अभिप्रेतः।

एते गुणाः सामाजिकसन्तुलनस्य, मानसिकशान्तेः च कारणानि भवन्ति। अन्ते "शतं वर्षाणि जीवति" इति कथनं केवलं दीर्घायुषः द्योतकं न, अपि तु समग्रस्वस्थजीवनस्य, मानसिकप्रसन्नतायाः तथा पुण्यफलप्राप्तेः प्रतीकात्मकनिर्देशः अपि भवति। सदाचारः मनुष्यस्य शारीरिकमानसिकदोषान् नाशयति, आत्मबलं वर्धयति, तेन दीर्घजीवनस्य कारणं भवति। अतः अयं श्लोकः शोधदृष्ट्या अयं निष्कर्षं प्रस्तौति यत् धर्मशास्त्रेषु मनुष्यस्य मूल्यनिर्णयः न बाह्यलक्षणैः, न सामाजिकस्थित्या, अपि तु सदाचार-श्रद्धा-अनसूयाभिः आन्तरिकगुणैः एव क्रियते। एते गुणाः एव मानवजीवनस्य दीर्घता, गुणवत्तां, तथा धर्मपरिणतिं सुनिश्चितयन्ति।

तत्रापि सदाचारिणां प्रशंसा दुराचारिणां निन्दा च तेन कृता। तद् यथा-

**श्रुतिस्मृत्युदितं सम्यङ् निबद्धं स्वेषु कर्मसु।**
**धर्ममूलं निषेवेत सदाचारमतिन्द्रितः ।।**
**आचारल्लभते ह्यायुराचारादीप्सिताः प्रजाः।**
**आचाराद्धनमक्षयमाचारो हन्त्यलक्षणम् ।।**
**दुराचारो हि पुरुषो लोके भवति निन्दितः।**
**दुःसभागी च सततं व्याधितोऽल्पायुरेव च ।।**[13]

एतेषु श्लोकेषु मनुना सुस्पष्टरूपेण धर्मशास्त्रीयपरम्परायां सदाचारस्य केन्द्रीयमहत्त्वं सुव्यवस्थितरूपेण प्रतिपादितम्। अत्र प्रथमं स्पष्टं क्रियते यत् धर्मः न केवलं श्रुतिस्मृतिषु सैद्धान्तिकरूपेण निर्दिष्टः, अपि तु स्वस्वकर्मसु यदा सम्यक् प्रकारेण निबद्धः भवति तदैव स धर्मः यथार्थरूपेण निषेवनीयः भवति। अतः धर्मस्य मूलम् आचारः एव इति सिद्धान्तः अत्र प्रतिपाद्यते। यः पुरुषः इन्द्रियनिग्रहयुक्तः सन् सदाचरणं कुरुते , स एव धर्ममार्गस्य यथार्थानुष्ठाता भवति।

इतश्च आचारात् आयुः लभ्यते अर्थात् सदाचारः शारीरिकमानसिकस्वास्थ्यस्य, दीर्घजीवनस्य च कारणं भवति। आचारात् इप्सिताः प्रजाः प्राप्यन्ते इति सामाजिकस्थैर्यस्य, कुलवृद्धेः च सूचकं भवति। आचारात् अक्षयं धनं लभ्यते। अत्र धनशब्देन केवलं द्रव्यं न, अपि तु यशः, पुण्यं, सद्गुणसम्पत्तिः च गृहीता। तथा आचारः अलक्षणम् अर्थात् अशुभशारीरिकमानसिकदोषान्नाशयति इति ।अपि च दुराचारस्य दुष्परिणामः प्रत्यक्षतया मनुना निरूप्यते। दुराचारी पुरुषः समाजे निन्दितः भवति, सदैव दुर्भाग्यग्रस्तः भवति, व्याधिभिः पीड्यते, अल्पायुश्च भवति। अनेन स्पष्टं सूचितं यत् आचारविच्युतिः न केवलं धार्मिकपतनं, अपि तु सामाजिक-शारीरिक-मानसिकविनाशस्य कारणं भवति।

अतः एते श्लोकाः समुच्चितरूपेण अयं शोधसिद्धान्तं स्थापयन्ति यत् - सदाचारः धर्मस्य मूलाधारः, व्यक्तित्वनिर्माणस्य आधारः, सामाजिकसौहार्दस्य कारणं तथा इह-परत्र उभयत्र कल्याणस्य सुनिश्चितसाधनं भवति। दुराचारः तु सर्वथा त्याज्यः, सर्वविनाशहेतुः च इति धर्मशास्त्राणां स्पष्टो निश्चयः। सदाचारयुक्तो मानवो न केवलं दीर्घजीवी भवति अपि तु दोषयुक्तानि शारीरिकिलक्षणानि नाशयति। वाञ्छिताः प्रजाः पुत्रपौत्रान् बहुधनं च सदाचारवान् प्राप्नोति । दुराचारेण जनः पतितो भवति ।परन्तु सदाचारः स्वर्गं प्रापयति । न केवलं धर्मः परोपकारेण परोपदेशेन परकार्यसाधनेन च यथार्थरुपमाप्नुयात्, किन्तु सज्जनानां महत्त्वपूर्णमाचरणमेव धर्मशब्दवाच्यं भवतीति विदुषामभिमतम् ।

आचारयुक्तो जनः संसारे सदा प्रंशसितो भवति । परं दुराचारी निन्दितो भवति। आचारः प्रभवो धर्मः इत्युक्तेः ज्ञायते यत् सदाचारः एव श्रेष्ठधर्मः इति ।सर्वं सुखं आचाराद्धि प्राप्यते । सर्वैः जनैः सह यः सद् –व्यवहारं करोति स एव सदाचारयुक्तो भवति । सदाचारात् सौजन्यं मिलति ।

वेदेषु,स्मृतिषु साहित्यदर्शनादिषु च सकलेषु शास्त्रेषु आचारस्य महत्वं प्रशंसितं दृश्यते। प्राक्तने काले भारतवर्षे गुरुकुलेषु आचार्य अध्यापनासमये सर्वेभ्यः छात्रेभ्यः सदाचारानुपदिशति स्म । यतो हि आचार एव मनुष्यस्य स्वभावे परिवर्त्तनमानयति। शीलं परं भूषणम् । शीलं तु आचारेणैव लभ्यते ।

आचारेण मनुष्यो व्यक्तित्वं लभते । व्यक्तित्वेन तस्य मर्यादा लोके प्रतिष्ठापिता भवति।

सदाचारिमनुष्य आत्मनिष्ठो भवति । तस्य अन्तःकरणं पवित्रं भवति । शुद्धान्तःकरणोना-त्मबलं परिवर्द्धितं भवति ।अनेनैव आचारेण मनुष्यः स्वयं सुखी भवति ।

अतः निखिलशासत्रलतामभूतयोः वेदधर्मशास्त्रयोः अर्थानुमाप-कत्वेन जीवनस्य सुनिर्वाहार्थं सर्वविधस्यापि कर्मणः आवश्यकत्वेन संस्कृति-संस्कृतयोः संरक्षत्वेन सर्वमान्यत्वेन च पवित्रेऽस्मिन् भारतवर्षे आचारस्य महत्त्वमतीवं गौरवपूर्णम् । अतो [14]वसिष्ठेनोक्तं यत्-

**आचारः परमो धर्मः सर्वेषामितिनिश्चयः ।**
**हीनाचारः परितात्मा प्रेत्य देह च नश्यति।।** इति

वस्तुतः भारतीयधर्मशास्त्रपरम्परायामाचारस्य परमस्थानं निश्चयेन प्रतिपाद्यते। "आचारः परमो धर्मः" इत्यनेन धर्मस्य तात्त्विकस्वरूपं स्पष्टं क्रियते। धर्मः केवलं सैद्धान्तिकोपदेशरूपेण न, अपि तु जीवनव्यवहारे आचरणरूपेण यदा अवतीर्णो भवति, तदैव स यथार्थतः धर्मः इति स्वीक्रियते। अतः आचारः धर्मस्य मूर्तरूपः, व्यवहारात्मकप्रकाशः च भवतीति सर्वेषां धर्मशास्त्रविदां सर्वसम्मतः निश्चयः। किं च आचाराभावाद्दुष्परिणामः प्रतिपद्यते पुरुषः। "हीनाचारः परितात्मा" इत्यनेन आचारविहीनः पुरुषः अन्तःकरणशुद्धिविहीनः, नैतिकमूल्यरहितः तथा आत्मविकासे पतितः इति सूचितम्। स पुरुषः जीवितकाले समाजे निन्द्यः भवति, धर्मफलवंचितः च भवति। "प्रेत्य देहं च नश्यति" इति कथनेन तस्य परलोकगतिस्थानं अपि अधोगतिरूपेण दर्श्यते, यशः-पुण्यरहितस्य तस्य देहस्य स्मरणमपि लोके नश्यतीति भावः निहितः।

अतः अयं सिद्धान्तो भवति यत् धर्मस्य संरक्षणं, समाजस्य स्थैर्यं, व्यक्तेः नैतिकोन्नतिः च सर्वं आचारादेव। आचारविहीनं शास्त्रज्ञानं निष्फलं भवति, सदाचारयुक्तं जीवनं तु इह– परत्र उभयत्र कल्याणसाधकं भवतीति।

**ग्रन्थसूची**


१.मनुस्मृतिः (मेधातिथिभाष्यसहिता) - एसियाटिक सोसाइटि आफ वेङ्गल, कलिकता, १९३९।

२.याज्ञवल्क्यस्मृतिः (समिताक्षरा) चौखम्बासंस्कृतसीरिज,वाराणसी- १९६८

३.धर्मशास्त्र का इतिहास , सं.अर्जुन चौवे काश्यप, उत्तरप्रदेश हिन्दी संस्थान, लखनउ,१९८० ।

४.अष्टादशस्मृतिः-सम्पादकःप. मिहिरचन्द्र, नागप्रकाशक, जवाहर-नगर, दिल्ली।

५.धर्मशास्त्र का इतिहास, डा.पी.वी, काणे, अनुवादः-अर्जुनचौ-वेकाश्यप,उ.प्र.हिन्दीसंस्थानम्, लखनऊ- १९६१

६.धर्मशास्त्रशब्दकोशः,पं.कुलमणिमिश्रशर्मा,ओडिशाराज्यपर्यटन-क्रीडासंस्कृतिनिर्देशालय, भुवनेश्वरम्,१९८१

७.धर्मशास्त्रस्येतिहास,प्रो.जयकृष्णमिश्रः,चौखम्बासंस्कृत सीरीज अफिस, वाराणसी, २०१०

८. धर्मसिन्धुः, श्रीकाशीनाथ उपाध्यायः, चौखम्बासंस्कृतसीरिज, वा-राणसी, १९६८

९.वशिष्ठधर्मसूत्रम्,सं.फ्युरेर्,भण्डारकरओरियण्टल्-रिसर्च-इंस्टीट्यूट, पुणे.१९३०

१०.वसिष्ठधर्मसूत्रम्– तत्त्वप्रकाशिकासहितम्, संपा-विश्वनाथस्वाइर्, पुरी, २००५

११.गौतमधर्मसूत्राणि, हिन्दी अनुवादक- डॉ.उमेशचन्द्रपाण्डेयः, चौखम्बासंस्कृतसीरिज ,वाराणसी,१९६६


**पाद टिप्पणी**

[१] वेदो धर्ममूलम्, तद्विदां च स्मृतिशीले गौ.ध.सू.1.1.1-2.

[२] मनु . २.६॥मन्वर्थ.पृ.37

[३] श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियम् आत्मनः ।
सम्यक्संकल्पजः कामो धर्ममूलम् इदं स्मृतम् ॥ या.स्मृ.1.7

[४] मनु.1.108

[५] मनु.1.109

[६] मनु.1.108

[७] प.स्मृ.1.89

[८] प.स्म.1.39

[९] व.ध.सू..6.4

[१०] व.ध.सू.6.1

[११] मनु.1.110

[१२] मनु.4.188

[१३] मनु.स्मृ.4.155,156,157

[१४] व.ध.सू.6.1